Edition prepared by Ashok Aklujkar as an experiment to test the UBC Nāgarī type font developed for use on the Macintosh 512K personal computer. Printing done with the Image-Writer that comes with the Macintosh. 24-point font reduced to 12-point font in the printing process for better resolution.

# ॥ पतञ्जलि-प्रणीतानि योग-सूत्राणि ॥*

## प्रथमः समाधि-पादः ।

अथ योगानुशासनम् ॥१॥

योगश् चित्त-वृत्ति-निरोधः ॥२॥

तदा द्रष्टुः स्व-रूपेऽवस्थानम् ॥३॥

वृत्ति-सारूप्यम् इतरत्र ॥४॥

वृत्तयः पञ्चतय्यः क्लिष्टा अक्लिष्टाः ॥५॥

प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः ॥६॥

प्रत्यक्षानुमानागमाः प्रमाणानि ॥७॥

विपर्ययो मिथ्या-ज्ञानम् अतद्-रूप-प्रतिष्ठम् ॥८॥

शब्दज्ञानानुपाती वस्तु-शून्यो विकल्पः ॥९॥

अभाव-प्रत्ययालम्बना वृत्तिर् निद्रा ॥१०॥

अनुभूत-विषयासंप्रमोषः स्मृतिः ॥११॥

---

* A preliminary edition by Ashok Aklujkar. See note at the end.

५. क्लिष्टाक्लि° Jhajjar.

Superior printing possible when these type fonts are mounted on the Leser-Writer.

अभ्यास-वैराग्याभ्यां तन्-निरोधः ॥१२॥

तत्र स्थितौ यत्नोऽभ्यासः ॥१३॥

स [?] तु [?] दीर्घ-काल-नैरन्तर्य-सत्कारासेवितो दृढ-भूमिः ॥१४॥

दृष्टानुश्रविक-विषय-वितृष्णस्य वशीकार-संज्ञा वैराग्यम् ॥१५॥

तत्-परं पुरुष-ख्यातेर् गुण-वैतृष्ण्यम् ॥१६॥

वितर्क-विचारानन्दास्मिता-रूपानुगमात् संप्रज्ञातः ॥१७॥

विराम-प्रत्ययाभ्यास-पूर्वः संस्कार-शेषोऽन्यः ॥१८॥

भव-प्रत्ययो विदेह-प्रकृति-लयानाम् ॥१९॥

श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञा-पूर्वक इतरेषाम् ॥२०॥

तीव्र-संवेगानाम् आसन्नः ॥२१॥

मृदु-मध्याधिमात्रत्वात् ततोऽपि विशेषः ॥२२॥

ईश्वर-प्रणिधानाद् वा ॥२३॥

क्लेश-कर्म-विपाकाशयैर् अपरामृष्टः पुरुष-विशेष ईश्वरः ॥२४॥

तत्र निरतिशयं सर्वज्ञ-बीजम् ॥२५॥

---

१४. स तु om. in Vivaraṇa. These two words could originally have been a part of the Bhāṣya. °कालादरनै° KSS. °त्कारसे° KSS.

पूर्वेषाम् अपि गुरुः कालेनानवच्छेदात् ॥२६॥

तस्य वाचकः प्रणवः ॥२७॥

तज्-जपस् तदर्थ-भावनम् ॥२८॥

ततः प्रत्यक्-चेतनाधिगमोऽप्यन्तरायाभावश् च ॥२९॥

व्याधि-स्त्यान-संशय-प्रमादालस्याविरति-भ्रान्ति-दर्शनालब्ध-भूमिकत्वानव-स्थितत्वानि चित्त-विक्षेपास् तेऽन्तरायाः ॥३०॥

दुःख-दौर्मनस्याङ्गमेजयत्व-श्वास-प्रश्वासा विक्षेप-सहभुवः ॥३१॥

तत्-प्रतिषेधार्थम् एक-तत्त्वाभ्यासः ॥३२॥

मैत्री-करुणा-मुदितोपेक्षाणां सुख-दुःख-पुण्यापुण्य-विषयाणां भावनातश् चित्त-प्रसादनम् ॥३३॥

प्रच्छर्दन-विधारणाभ्यां वा प्राणस्य ॥३४॥

विषयवती वा प्रवृत्तिर् उत्पन्ना मनसः स्थिति-निबन्धनी ॥३५॥

विशोका वा ज्योतिष्मती ॥३६॥

वीत-राग-विषयं वा चित्तम् ॥३७॥

---

२६. [स] at the beginning in the Vivaraṇa edn. स additional at the beginning in KSS. पातनिका "स एष" इति। सूत्रं "पूर्वेषाम् अपि गुरुः, कालेनानवच्छेदात्" - Vā.

स्वप्न-निद्रा-ज्ञानालम्बनं वा ॥३८॥

यथाभिमत-ध्यानाद् वा ॥३९॥

परमाणु-परम-महत्त्वान्तोऽस्य वशीकारः ॥४०॥

क्षीण-वृत्तेर, अभिजातस्येव मणेर्, ग्रहीतृ-ग्रहण-ग्राह्येषु

तत्स्थ-तदञ्जनता-समापत्तिः ॥४१॥

तत्र शब्दार्थ-ज्ञान-विकल्पैः संकीर्णा सवितर्का समापत्तिः ॥४२॥

स्मृति-परिशुद्धौ स्व-रूप-शून्येवार्थ-मात्र-निर्भासा निर्वितर्का ॥४३॥

एतयैव सविचारा निर्विचारा च सूक्ष्म-विषया व्याख्याता ॥४४॥

सूक्ष्म-विषयत्वं चालिङ्ग-पर्यवसानम् ॥४५॥

ता एव सबीजः समाधिः ॥४६॥

निर्विचार-वैशारद्येऽध्यात्म-प्रसादः ॥४७॥

ऋतंभरा तत्र प्रज्ञा ॥४८॥

श्रुतानुमान-प्रज्ञाभ्याम् अन्य-विषया विशेषार्थत्वात् ॥४९॥

तज्जः संस्कारोऽन्य-संस्कार-प्रतिबन्धी ॥५०॥

---

४३. °र्भासान् Vivaraṇa.

४९. °भ्यां सामान्य° KSS.

तस्यापि निरोधे सर्व-निरोधान् निर्बीजः समाधिः ॥५१॥

[इति पतञ्जलि-विरचिते योग-सूत्रे प्रथमः समाधि-पादः ।] *

*द्वितीयः साधन-पादः ।*

तपः-स्वाध्यायेश्वर-प्रणिधानानि क्रिया-योगः ॥१॥

समाधि-भावनार्थः क्लेश-तनूकरणार्थश् च ॥२॥

अविद्यास्मिता-राग-द्वेषाभिनिवेशाः क्लेशाः ॥३॥

अविद्या क्षेत्रम् उत्तरेषां प्रसुप्त-तनु-विच्छिन्नोदाराणाम् ॥४॥

अनित्याशुचि-दुःखानात्मसु नित्य-शुचि-सुखात्म-ख्यातिर् अविद्या ॥५॥

दृग्-दर्शन-शक्त्योर् एकात्मतेवास्मिता ॥६॥

---

५१. इति not used at the end as it is used in the case of the last sūtras of the third and fourth pādas.

* Colophons at the end of the pādas vary considerably in the editions. Mss. must be consulted to determine the original forms of such colophons. They have been supplied here by the editor.

३. °शाः पञ्च क्ले° Vidyāsāgara.

सुखानुशयी रागः ॥७॥

दुःखानुशयी द्वेषः ॥८॥

स्व-रस-वाही विदुषोऽपि तथा-रूढोऽभिनिवेशः ॥९॥

ते प्रतिप्रसव-हेयाः सूक्ष्माः ॥१०॥

ध्यान-हेयास् तद्-वृत्तयः ॥११॥

क्लेश-मूलः कर्माशयो दृष्टादृष्ट-जन्म-वेदनीयः ॥१२॥

सति मूले तद्-विपाको जात्यायुर्-भोगाः ॥१३॥

ते ह्लाद-परिताप-फलाः पुण्यापुण्य-हेतुत्वात् ॥१४॥

परिणाम-ताप-संस्कार-दुःखैर् गुण-वृत्ति-विरोधाच् च दुःखम् एव सर्वं विवेकिनः ॥१५॥

हेयं दुःखम् अनागतम् ॥१६॥

द्रष्टृ-दृश्ययोः संयोगो हेय-हेतुः ॥१७॥

प्रकाश-क्रिया-स्थिति-शीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥१८॥

---

७. °नुजन्मा Vivaraṇa, which records also the reading accepted above.

८. °नुजन्मा Vivaraṇa, which records also the reading accepted above.

विशेषाविशेष-लिङ्ग-मात्रा-लिङ्गानि गुण-पर्वाणि ॥१९॥

द्रष्टा दृशि-मात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥२०॥

तदर्थ एव दृश्यस्यात्मा ॥२१॥

कृतार्थं प्रति नष्टम् अप्यनष्टं तद्, अन्य-साधारणत्वात् ॥२२॥

स्व-स्वामि-शक्त्योः स्व-रूपोपलब्धि-हेतुः संयोगः ॥२३॥

तस्य हेतुर् अविद्या ॥२४॥

तदभावात् संयोगाभावो हानं. तद् दृशेः कैवल्यम् ॥२५॥

विवेक-ख्यातिर् अविप्लवा हानोपायः ॥२६॥

तस्य सप्तधा प्रान्त-भूमिः प्रज्ञा ॥२७॥

योगाङ्गानुष्ठानाद् अशुद्धि-क्षये ज्ञान-दीप्तिर् आ विवेक-ख्यातेः ॥२८॥

यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टाव्
अङ्गानि ॥२९॥

अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहा यमाः ॥३०॥

जाति-देश-काल-समयानवच्छिन्नाः सार्वभौमा महा-व्रतम् ॥३१॥

---

१९. °त्रा-लिङ्गा Vivaraṇa °र्वाणः Vivaraṇa.

३०. °-सत्यमस्ते° Vidyāsāgara.

३१. एते additional at the beginning KSS.

शौच-संतोष-तपः-स्वाध्यायेश्वर-प्रणिधानानि नियमाः ॥३२॥

वितर्क-बाधने प्रतिपक्ष-भावनम् ॥३३॥

वितर्का हिंसादयः कृत-कारितानुमोदिता लोभ-क्रोध-मोह-पूर्वका
मृदु-मध्याधिमात्रा दुःखाज्ञानानन्त-फला इति
प्रतिपक्ष-भावनम् ॥३४॥

अहिंसा-प्रतिष्ठायां तत्-संनिधौ वैर-त्यागः ॥३५॥

सत्य-प्रतिष्ठायां क्रिया-फलाश्रयत्वम् ॥३६॥

अस्तेय-प्रतिष्ठायां सर्व-रत्नोपस्थानम् ॥३७॥

ब्रह्मचर्य-प्रतिष्ठायां वीर्य-लाभः ॥३८॥

अपरिग्रह-स्थैर्ये जन्म-कथंता- संबोधः ॥३९॥

शौचात् स्वाङ्ग-जुगुप्सा परैर् असंसर्गः ॥४०॥

सत्त्व-शुद्धि-सौमनस्यैकाग्र्येन्द्रिय-जयात्म-दर्शन-योग्यत्वानि च ॥४१॥

संतोषाद् अनुत्तमः सुख-लाभः ॥४२॥

---

४१. °काग्रतेन्द्रि° KSS. एकाग्रता, not ऐकाग्र्य, is used in 3.11-12, but Bhāṣya, Vivaraṇa and Vā. have ऐकाग्र्य here.

४२. °त्तमसु° i.e. a compound in Vidyāsāgara; Bhāṣya does not indicate how it read the sūtra.

कायेन्द्रिय-सिद्धिर् अशुद्धि-क्षयात् तपसः ॥४३॥

स्वाध्यायाद् इष्ट-देवता-संप्रयोगः ॥४४॥

समाधि-सिद्धिर् ईश्वर-प्रणिधानात् ॥४५॥

स्थिर-सुखम् आसनम् ॥४६॥

प्रयत्न-शैथिल्यानन्त-समापत्तिभ्याम् ॥४७॥

ततो द्वन्द्वानभिघातः ॥४८॥

तस्मिन् सति श्वास-प्रश्वासयोर् गति-विच्छेदः प्राणायामः ॥४९॥

बाह्याभ्यन्तर-स्तम्भ-वृत्तिर् देश-काल-संख्याभिः परिदृष्टो दीर्घ-सूक्ष्मः ॥५०॥

बाह्याभ्यन्तर-विषयाक्षेपी चतुर्थः ॥५१॥

ततः क्षीयते प्रकाशावरणम् ॥५२॥

धारणासु च योग्यता मनसः ॥५३॥

स्व-विषयासंप्रयोगे चित्तस्य स्व-रूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥५४॥

---

४७. °नन्त्य-स° KSS.

५०. स तु additional at the beginning in KSS; however, Vivaraṇa and Vā. clearly indicate that स तु is not a part of the sūtra for them.

५४. °त्तस्य स्व° Vidyāsāgara; however, Bhāṣya, etc. clearly favor the compound reading.

ततः परमा वश्यतेन्द्रियाणाम् ॥५५॥

[ इति पतञ्जलि-विरचिते योग-सूत्रे द्वितीयः साधन-पादः । ]

*तृतीयः विभूति-पादः ।*

देश-बन्धश् चित्तस्य धारणा ॥१॥

तत्र प्रत्ययैक-तानता ध्यानम् ॥२॥

तद् एवार्थ-मात्र-निर्भासं स्व-रूप-शून्यम् इव समाधिः ॥३॥

त्रयम् एकत्र संयमः ॥४॥

तज्-जयात् प्रज्ञालोकः ॥५॥

तस्य भूमिषु विनियोगः ॥६॥

त्रयम् अन्तरङ्गं पूर्वेभ्यः ॥७॥

तद् अपि बहिरङ्गं निर्बीजस्य ॥८॥

व्युत्थान-निरोध-संस्कारयोर् अभिभव-प्रादुर्भावौ निरोध-क्षण-चित्तान्वयो निरोध-परिणामः ॥९॥

तस्य प्रशान्त-वाहिता संस्कारात् ॥१०॥

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधि-परिणामः ॥११॥

ततः पुनः शान्तोदितौ तुल्य-प्रत्ययौ चित्तस्यैकाग्रता-परिणामः ॥१२॥

एतेन भूतेन्द्रियेषु धर्म-लक्षणावस्था-परिणामा व्याख्याताः ॥१३॥

शान्तोदिताव्यपदेश्य-धर्मानुपाती धर्मी ॥१४॥

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥१५॥

परिणाम-त्रय-संयमाद् अतीतानागत-ज्ञानम् ॥१६॥

शब्दार्थ-प्रत्ययानाम् इतरेतराध्यासात् संकरः. तत्-प्रविभाग-संयमात्
सर्व-भूत-रुत-ज्ञानम्॥१७॥

संस्कार-साक्षात्-करणात् पूर्व-जाति-ज्ञानम् ॥१८॥

प्रत्ययस्य पर-चित्त-ज्ञानम् ॥१९॥

न च तत् सालम्बनं, तस्याविषयीभूतत्वात् ॥२०॥

काय-रूप-संयमात् तद्-ग्राह्य-शक्ति-स्तम्भे चक्षुः-प्रकाशासंप्रयोगेऽन्तर्-धानम्
॥२१॥

सोपक्रमं निरुपक्रमं च कर्म. तत्-संयमाद् अपरान्त-ज्ञानम्,
अरिष्टेभ्यो वा ॥२२॥

---

१२. तत्र पु° Vivaraṇa edn. First two words om. KSS.

२०. न तत् KSS. च सा° Vivaraṇa.

मैत्र्यादिषु बलानि ॥२३॥

बलेषु हस्ति-बलादीनि ॥२४॥

प्रवृत्त्यालोक-न्यासात् सूक्ष्म-व्यवहित-विप्रकृष्ट-ज्ञानम् ॥२५॥

भुवन-ज्ञानं सूर्ये संयमात् ॥२६॥

चन्द्रे तारा-व्यूह-ज्ञानम् ॥२७॥

ध्रुवे तद्-गति-ज्ञानम् ॥२८॥

नाभि-चक्रे काय-व्यूह-ज्ञानम् ॥२९॥

कण्ठ-कूपे क्षुत्-पिपासा-निवृत्तिः ॥३०॥

कूर्म-नाड्यां स्थैर्यम् ॥३१॥

मूर्ध-ज्योतिषि सिद्ध-दर्शनम् ॥३२॥

प्रातिभाद् वा सर्वम् ॥३३॥

हृदये चित्त-संवित् ॥३४॥

सत्त्व-पुरुषयोर् अत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात्
स्वार्थ-संयमात् पुरुष-ज्ञानम् ॥३५॥

ततः प्रातिभ-श्रावण-वेदनादर्शास्वाद-वार्ता जायन्ते ॥३६॥

---

३५. °शेषाद् भो° KSS. °रार्थात् Vivaraṇa. °रार्थान्यस्वा° KSS. स्वार्थे सं° could have been the Vivaraṇa author's reading.

ते समाधाव् उपसर्गा. व्युत्थाने सिद्धयः ॥३७॥

बन्ध-कारण-शैथिल्यात् प्रचार-संवेदनाच् च चित्तस्य पर-शरीरावेशः ॥३८॥

उदान-जयाज् जल-पङ्क-कण्टकादिष्वसङ्ग उत्क्रान्तिश् च ॥३९॥

समान-जयाज् ज्वलनम् ॥४०॥

श्रोत्राकाशयोः संबन्ध-संयमाद् दिव्यं श्रोत्रम् ॥४१॥

कायाकाशयोः संबन्ध-संयमाल् लघु-तूल-समापत्तेश् चाकाश-गमनम् ॥४२॥

बहिर् अकल्पिता वृत्तिर् महा-विदेहा. ततः प्रकाशावरण-क्षयः ॥४३॥

स्थूल-स्व-रूप-सूक्ष्मान्वयार्थवत्त्व-संयमाद् भूत-जयः ॥४४॥

ततोऽणिमादि-प्रादुर्भावः काय-संपत् तद्-धर्मानभिघातश् च ॥४५॥

रूप-लावण्य-बल-वज्र-संहननत्वानि काय-संपत् ॥४६॥

ग्रहण-स्व-रूपास्मितान्वयार्थवत्त्व-संयमाद् इन्द्रिय-जयः ॥४७॥

ततो मनो-जवित्वं विकरण-भावः प्रधान-जयश् च ॥४८॥

सत्त्व-पुरुषान्यता-ख्याति-मात्रस्य सर्व-भावाधिष्ठातृत्वं
सर्व-ज्ञातृत्वं च ॥४९॥

---

४०. °जयात् प्रज्व° KSS.

४८. °जवित्वं Vidyāsāgara, Jhajjar, KSS. Is °जवत्वं in Vivaraṇa an attempt to eliminate a grammatically difficult *matvarthīya*?

तद्-वैराग्याद् अपि दोष-बीज-क्षये कैवल्यम् ॥५०॥

स्थान्युपनिमन्त्रणे सङ्ग-स्मयाकरणं पुनर् अनिष्ट-प्रसङ्गात् ॥५१॥

क्षण-तत्-क्रमयोः संयमाद् विवेकजं ज्ञानम् ॥५२॥

जाति-लक्षण-देशैर् अन्यतानवच्छेदात् तुल्ययोस् ततः प्रतिपत्तिः ॥५३॥

तारकं सर्व-विषयं सर्वथा-विषयम् अक्रमं चेति विवेकजं ज्ञानम् ॥५४॥

सत्त्व-पुरुषयोः शुद्धि-साम्ये कैवल्यम् इति ॥५५॥

[इति पतञ्जलि-विरचिते योग-सूत्रे तृतीयो विभूति-पादः]

*चतुर्थः कैवल्य-पादः ।*

जन्मौषधि-मन्त्र-तपः-समाधिजाः सिद्धयः ॥१॥

जात्यन्तर-परिणामः प्रकृत्यापूरात् ॥२॥

निमित्तम् अप्रयोजकं प्रकृतीनां. वरण-भेदस् तु ततः क्षेत्रिकवत् ॥३॥

निर्माण-चित्तान्यस्मिता-मात्रात् ॥४॥

प्रवृत्ति-भेदे प्रयोजकं चित्तम् एकम् अनेकेषाम् ॥५॥

तत्र ध्यानजम् अनाशयम् ॥६॥

---

५१. °पम° Vivaraṇa.

५५. इति om. Jhajjar, KSS. इति[ः] सूत्र-समाप्तौ Vā.

कर्माशुक्लाकृष्णं योगिनस्. त्रिविधम् इतरेषाम् ॥७॥

ततस् तद्-विपाकानुगुणानाम् एवाभिव्यक्तिर् वासनानाम् ॥८॥

जाति-देश-काल-व्यवहितानाम् अप्यानन्तर्यं, स्मृति-संस्कारयोर्
एक-रूपत्वात् ॥९॥

तासाम् अनादित्वं चाशिषो नित्यत्वात् ॥१०॥

हेतु-फलाश्रयालम्बनैः संगृहीतत्वाद् एषाम् अभावे तदभावः ॥११॥

अतीतानागतं स्व-रूपतोऽस्त्यध्व-भेदाद् धर्माणाम् ॥१२॥

ते व्यक्त-सूक्ष्मा गुणात्मानः ॥१३॥

परिणामैकत्वाद् वस्तु-तत्त्वम् ॥१४॥

वस्तु-साम्ये चित्त-भेदात् तयोर् विभक्तः पन्थाः ॥१५॥

न चैक-चित्त-तन्त्रं वस्तु तद् अप्रमाणकं तदा किं स्यात् ॥१६॥

तदुपरागापेक्षत्वात् चित्तस्य वस्तु ज्ञाताज्ञातम् ॥१७॥

सदा ज्ञाताश् चित्त-वृत्तयस्, तत्-प्रभोः पुरुषस्यापरिणामित्वात् ॥१८॥

---

१०. °दित्वम् आशि° KSS.

१५. विविक्तः Vivaraṇa, KSS.

१७. °पेक्षित्वात् Vidyāsāgara, Jhajjar, KSS. Is °पेक्षत्वात् in Vivaraṇa an attempt to eliminate a grammatically difficult *matvarthīya*?

न तत् स्वाभासं, दृश्यत्वात् ॥१९॥

एक-समये चोभयानवधारणम् ॥२०॥

चित्तान्तर-दृश्ये बुद्धि-बुद्धेर् अतिप्रसङ्गः स्मृति-संकरश् च ॥२१॥

चितेर् अप्रतिसंक्रमायास् तदाकारापत्तौ स्व-बुद्धि-संवेदनम् ॥२२॥

द्रष्टृ-दृश्योपरक्तं चित्तं सर्वार्थम् ॥२३॥

तद् असंख्येय-वासना-चित्रम् अपि परार्थं, संहत्य-कारित्वात् ॥२४॥

विशेष-दर्शिन आत्म-भाव-भावना-विनिवृत्तिः ॥२५॥

तदा विवेक-निम्नं कैवल्य-प्राग्-भारं चित्तम् ॥२६॥

तच्-छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥२७॥

हानम् एषां क्लेशवद् उक्तम् ॥२८॥

प्रसंख्यानेऽप्यकुसीदस्य सर्वथा-विवेक-ख्यातेर् धर्म-मेघः समाधिः ॥२९॥

ततः क्लेश-कर्म-निवृत्तिः ॥३०॥

तदा सर्वावरण-मलापेतस्य ज्ञानस्यानन्त्याज् ज्ञेयम् अल्पम् ॥३१॥

---

२४. °नाभिश् चि° Vidyāsāgara, Jhajjar, KSS. Bhāṣya too could have read so.

२५. °ना-नि° Vivaraṇa, KSS.

ततः कृतार्थानां परिणाम-क्रम-परिसमाप्तिर् गुणानाम् ॥३२॥

क्षण-प्रतियोगी परिणामापरान्त-निर्ग्राह्यः क्रमः ॥३३॥

पुरुषार्थ-शून्यानां गुणानां प्रतिप्रसवः कैवल्यं, स्व-रूप-प्रतिष्ठा वा चिति-शक्तिर् इति ॥३४॥

[इति पतञ्जलि-विरचिते योग-सूत्रे चतुर्थः कैवल्य-पादः ।

इति पातञ्जल-योग-सूत्राणि ॥]

---

३२. °क्रम-स° Vidyāsāgara, Jhajjar, KSS. Reading of Vā. cannot be determined.

३४. °शक्तेर् KSS. सौत्र इति-शब्दः शास्त्र-परिसमाप्तौ Vā.

-------------*-------------

BOOKS USED FOR THIS PRELIMINARY VERSION OF A POSSIBLE CRITICAL EDITION OF THE YOGA-SŪTRAS.

KSS. The Yoga-sūtram by Maharṣi Patañjali with the Yoga-pradīpikā commentary by Pandit Bala-dewa Miśra. Kashi Sanskrit Series (Haridas Sanskrit Grantha-mālā) no. 85, 1931. B132 V6 P264 1931.

Jhajjar. Ārya-muni. Yogāryya-bhāṣya. Bhāṣya-kartā Āryya-muni. Jhajjara: Harayāṇā Sāhitya Saṃsthāna, Gurukula Jhajjara. 2029 Vi[krama-saṃvat = 1973]. B132 Y6 A73 1973. Pp. 1-16 of the appendix.

Vā. Patanjala Darshana of the System of Yoga Philosophy by Maharshi Kapila [!] with the Commentary of Vyasa and the Gloss of Vachaspati Mishra. Edited and published by Pandit Jibananda Vidyasagara. Third edition. Calcutta. Printed at the Bachaspatya Press. 1940.

Vivaraṇa. Pātañjala-Yogasūtra-bhāṣya-vivaraṇaṁ of Śaṅkara-bhagavat-pāda. Critically edited with introduction by .... Polakam Sri Rama Sastri .... and S. R. Krishnamurthi Sastri. Madras: Government Oriental Manuscripts Library. 1952.